ब्रह्महा युध्यतेऽयुद्धो देहं त्यक्त्वा रणाजिरे।
न युद्धी रणभग्नानां क्वते कश्चिन्महापथात्॥
संग्रामे युध्यतो लक्ष्मीः कीर्त्तिः स्यात् स्वर्गति-
स्तथा।
भग्नस्य तेऽपि नश्यन्ति महासत्त्वान्महारणात्॥
तस्मात् सत्त्वेन यत्किञ्चित् क्रियते तच्छुभप्रदम्।
यज्ञं दानं व्रतं वापि संग्रामे नृपसत्तम!॥"
इत्यादौ वह्निपुराणे संग्रामप्रशंसा॥ *॥
अथ युद्धनिर्णयः।
"यत्रायुद्धे ध्रुवं नाशो युद्धे जीवितसंशयः।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः॥
आत्मोदये विग्रहणीयात् चोभौ नात्मबले यदि।
व्यसने च प्रहर्त्तव्यं शत्रौ न तु विपर्य्यये॥
स्वयं राज्ञा न योद्धव्यं येऽपि शास्त्रार्थको-
विदाः।
हता युद्धेषु दृश्यन्ते शक्तेभ्यः शक्तिमत्तराः॥
रथयुद्धं समे देशे विषमे हस्तिसङ्गरः।
अश्वयुद्धं मरौ देशे पत्तियुद्धञ्च दुर्गमे॥
अल्पके सर्व्वयुद्धं स्यान्नौकायुद्धं जलप्लुते।
संहत्य योधयेदल्पान् कामं विस्तारयेद्बहून्॥
सूचीमुखमनीकं स्यादल्पं हि बहुभिः सह।
अपि पश्चाद्गतः शूरान् निघ्नन्ति परवाहिनीम्।
येऽपि वा पञ्चषट्सप्तसहिताः कृतनिश्चयाः॥"
अथ युद्धासननिर्णयः।
"अन्यद्वारा विपक्षन्तु विग्रह्यासनमुच्यते।
अरिं विगृह्य वा स्थानं विग्रहासनमुच्यते॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः।
सन्धाय यदवस्थानं सन्धायासनमुच्यते॥
उदासीने मध्यमे वा समाने प्रतिशङ्कया।
एकीभूय यवस्थानं सम्भूयासनमुच्यते॥
सर्व्वेषां प्रीतिजननं निजराष्ट्रस्य लक्षणम्।
एतत् प्रीत्यासनं नाम सर्व्वासनमहत्तरम्॥"
अथ द्वन्द्वयुक्तिः।
"राज्ञो बलं नहि बलं द्वन्द्वमेव बलं बलम्।
अप्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद्भवेत्॥"
तथा च।
"एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते॥
अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्॥
यद्दैवमुचितं द्वन्द्वं गिरिनद्यादिसंश्रयम्।
अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्॥
प्राकारपरिखारण्यसंश्रयं यन्निवेदितः।
कृत्रिमं नाम विज्ञेयं लक्षालक्षन्तु वैरिणाम्॥"
अथाकृत्रिमद्वन्द्वयुक्तिः।
"अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः।
सजलाश्रयसम्भारभोज्यद्रव्यसमाश्रयः॥
सुखनिःसरणो द्वन्द्वः पर्व्वताख्यो महीभुजाम्।
नद्यो गभीरविस्तीर्णाश्चतुर्दिक्षु व्यवस्थिताः॥
तन्मध्ये भूप्रदेशो यो नदीद्वन्द्वः स उच्यते।
यद्वान्यच्चिरकालीनं दुर्लङ्घ्यविपिनादिकम्।
तन्मध्यरचिता भूमिर्द्वन्द्वत्वेनोपतिष्ठते।
वनद्वन्द्वमिति ख्यातं यथापूर्व्वं महत्तरम्॥"

कृत्रिमद्वन्द्वयुक्तिर्यथा,—
"यस्मिन्नाल्पे गिरिर्नास्ति नद्यो वा गहनोदकाः।
तस्य मध्ये महीपालः कृत्रिमं द्वन्द्वमारभेत्॥
गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः।
द्वन्द्वत्वेन समादिष्टाः परिखा बहुयादसः॥
विशालशालं सुघनं बहुकण्टकि सङ्कटम्।
द्वन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्॥
अधोऽधो वध्यमानोऽपि कन्दरोऽल्पजलं स्रवन्।
द्वन्द्वत्वेन समुद्दिष्टः स दुर्लङ्घ्यो हि भूभुजाम्॥
सर्व्वतः परिखां कृत्वा निबन्धोपरि कन्दरम्।
तज्जलप्लुतदेशत्वाज्जलद्वन्द्वं तदुच्यते॥
एषामभावे निम्नस्य भूप्रदेशस्य बन्धना।
वर्षास्वपगते वारि जलद्वन्द्वं ततो भवेत्॥
एतयोरपि संमिश्रात् संमिश्रं द्वन्द्वमाचरेत्।
आश्रित्य कृत्रिमं द्वन्द्वं बलवद्वैरिणो दिशि॥
अन्यत्र कृत्रिमं द्वन्द्वं कृत्वा नरपतिर्विशेत्।
रथपतिर्यदा वैरी स्थलद्वन्द्वं तदाचरेत्॥
गजाश्वनाथश्चेद्वैरी जलद्वन्द्वं तदाचरेत्।
गिरिद्वन्द्वं नृपः सेवेत् यस्य स्याद्द्विविधो रिपुः॥
सर्व्वं हि त्रिविधं युद्धं समासादुपादिश्यते।
प्रतिराजस्य राष्ट्रान्ते प्रकटे गुप्त एव च॥
राष्ट्रान्ते सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम्।
गुप्ते कोषकोषसम्भारं संरक्षेदिति निश्चयः॥"
अथ सामान्यतो गुणाः। तथा हि नीति-
शास्त्रम्।
"सप्रवेशापसरणं द्वन्द्वमुत्तममुच्यते।
अन्यच्च वन्दिशालेव न तादृग्बहुमाश्रयेत्॥
धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च।
मनुष्यद्वन्द्वसंसर्गं वनद्वन्द्वञ्च तानि षट्॥"
अन्ये तु।
"न द्वन्द्वं द्वन्द्वमित्याहुर्योद्धृद्वन्द्वं प्रकीर्त्तितम्।
योद्धृशून्यं हि यद्युद्धं मृतकायसमं हि तत्॥"
अथान्यच्चापि।
"यावत्प्रमाणं नगरं हि राज्ञां
ततो भवेदुत्तममध्यमान्त्यम्।
त्रिंशच्छलत्वादृगुणोत्तरेण
त्रिदेशजानां धरणीपतीनाम्॥"
गर्गस्तु।
"यदन्यद्विविधं द्वन्द्वं प्रोच्यते धरणीभुजाम्।
तेभ्य एवातिरिच्येत मन्त्रद्वन्द्वं विशेषतः॥
अन्येषु दैवाश्रितेषु मन्त्रद्वन्द्वाज्जयेन्नृपः।
मन्त्रद्वन्द्वे हि भिन्ने हि न चान्यत् कार्य्यकारकम्॥
यदैव वैरिदुर्लङ्घ्यं विस्तीर्णं विषमञ्च तत्।
सप्रवेशापसरणं तद्युद्धमुत्तमं विदुः॥"
इति युक्तिकल्पतरुः॥
तद्वैदिकपर्य्यायः। रणः १ विवाक् २ विखादः ३
नदनुः ४ भरे ५ आक्रन्दे ६ आहवे ७ आजौ ८
पृतनाज्यम् ९ अभीके १० समीके ११ मम-
सत्यम् १२ नेमधिता १३ सङ्काः १४ समितिः १५
समनम् १६ मीळ्हे १७ पृतनाः १८ स्पृधः १९
मृधः २० पृत्सु २१ समत्सु २२ समर्य्ये २३
समरणे २४ समोहे २५ समिथे २६ सङ्खे २७
सङ्गे २८ संयुगे २९ सङ्गथे ३० सङ्गमे ३१ वृत्र-
तूर्य्ये ३२ पृक्षे ३३ आणौ ३४ शूरसातौ ३५
वाजसातौ ३६ समनीके ३७ खले ३८ खजे ३९
पौंस्ये ४० महाधने ४१ वाजे ४२ अज्म ४३
सद्म ४४ संयत् ४५ संवतः ४६। इति षट्चत्वा-
रिंशत् संग्रामनामानि। इति वेदनिघण्टौ
२। १७॥

युद्धरङ्गः, पुं, (युद्धे रङ्गो रागोऽस्य।) कार्त्तिकेयः।
इति शब्दचन्द्रिका॥ (युद्धस्य रङ्गः। युद्ध-
स्थलम्। यथा, महाभारते। ७। ९५।१८।
"अन्योऽन्यं जघ्निरे क्रुद्धाः युद्धरङ्गगता नराः॥")

युद्धसारः, पुं, (युद्धस्य सारः।) घोटकः। इति
शब्दचन्द्रिका॥

युध, य औ ङ युद्धे। इति कविकल्पद्रुमः॥ (दिवा०-
आत्म०-अक०-हनने सक०-अनिट्।) य ङ,
युध्यते। औ, योद्धा। संमुखस्थितयोर्द्वयोः
सांग्रामिकरीत्या परस्पराभिभवेच्छा युद्धम्।
युध्यते योधः कदाचिदेकस्य सह भावविव-
क्षायां युध्यते योधः परेण। कदाचिद्धननेऽपि
युध्यते चौरं राजा हन्तीत्यर्थः। यो भक्त-
पिण्डस्य कृते न युध्येदिति अस्माद्भावे क्विपि
तमिच्छतीति क्ये तं करोतीति कण्ड्वादित्वात्
क्ये वा साध्यम्। इति दुर्गादासः॥

युधानः, पुं, (युध्यतेऽसौ। युध् + "युधिबुधिदृशः
किच्च।" उणा० २। ९०। इति आनच्। स च
कित्।) क्षत्त्रियः। इत्युणादिकोषः॥ (रिपुः।
इत्युज्ज्वलदत्तः॥)

युधिकः, त्रि, योद्धा। युधशब्दात् ष्णिकप्रत्ययेन
निष्पन्नः॥

युधिष्ठिरः, पुं, (युधि संग्रामे स्थिरः। "गवि-
युधिभ्यां स्थिरः।" ८। ३। ९५। इति षत्वम्।
"हलदन्तात् सप्तम्याः संज्ञायाम्।" ६। ३। ९।
इति सप्तम्या अलुक्।) पाण्डवराजः। स कुन्ती-
गर्भे धर्म्माज्जातः। तत्पर्य्यायः। अजातशत्रुः २
शल्यारिः ३ धर्म्मपुत्त्रः ४ अजमीढः ५। इति
हेमचन्द्रः। ३। ३७१॥ (मृगशापाभितप्तः
पाण्डुर्निरपत्यतया खिन्नचित्तः पुत्त्रार्थमेकदा
धर्म्मपत्नीं कुन्तीमुवाच। शुचिस्मिते! अनपत्यो
हि न शुभलोकार्ह इति विचिन्त्य त्वं मदुपका-
रार्थं केनापि पुत्त्रमुत्पादयेति। एवमुक्ता कुन्ती
दृष्ट्वा च पत्युरात्यन्तिकहितार्थं धार्म्मिकपुत्त्रलाभाय
दुर्व्वासःप्रदत्तमन्त्रबलेन धर्म्ममाहूय तेन सङ्गता
युधिष्ठिरं पुत्त्रमलभत। यदुक्तं महाभारते। १।
१२३। ५—८।
"संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्त्रं वरारोहा सर्व्वप्राणभृतां हितम्॥
ऐन्द्रे चन्द्रमसायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे।
दिवा मध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते॥
समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः॥
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति।